**ઓં** (3)

## ગુરુધ્યાનં

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુ
ગુરુર્દેવો મહેશ્વરઃ
ગુરુસાક્ષાત્ પરંબ્રહ્મઃ
તસ્મૈશ્રી ગુરવે નમઃ

અજ્ઞાનતિમિરાન્ધસ્ય
જ્ઞાનઞ્જનશલાકયા
ચક્ષુરુન્મીલિતં યેન
તસ્મૈશ્રી ગુરવે નમઃ

અખણ્ડમણ્ડલાકારં
વ્યાપ્તં યેન ચરાચરં
તત્પદં દર્શિતંયેન
તસ્મૈ શ્રીગુરવે નમઃ

અરુણારુણકલ્લોલ
કરૂણાકલિતાત્મને
નરાનુગ્રહરૂપાય
ગુરવે કુસુમાઞ્જલિ

કામક્રુધાદ્યખિલદોષમપાસ્ય રામ–
નામાક્ષરામૃતકણૈર્ હૃદયંનિષિઞ્ચન્
યઃ સાથ્વનુગ્રહપથેન દિવંવિવેશ
તં નીલકણ્ઠગુરુદેવમનુસ્મરામિઃ

વિગ્રહે રામચન્દ્રસ્ય વિલયીભૂત ચેતસા
અહં બ્રહ્મેતિવેદાન્ત તત્ત્વબોધ સ્વરૂપિણે
વિભૂતિમાત્રદાનેન સર્વ્વાનુગ્રહદાયિને
શ્રી નીલકણ્ઠશિષ્યાય સત્યાનન્દાય તે નમઃ

## શક્તિગણપતિધ્યાનં

માતંગાનનમાખુવાહનમજં શકત્યુત્થતેજોમયં

ધ્યાયેત્તં દધતં વરાભયકરં શંખં ચ પાશં તતઃ
શક્તિં પઙ્કજમિક્ષુમેવ કણિશં હૈમં ચ દિવ્યંઘટં
પક્વં દાડિમમુદ્ભટોચ્ચલગદાં શૂલં રથાઙ્ગં કરૈઃ

## મૂલમન્ત્રં

ઓં ગં ગણપતયે નમઃ (3)

## <u>સરસ્વતી ધ્યાનં</u>

યા કુન્દેન્દુતુષારહારધવળા
યા શુભ્રવસ્ત્રાવૃતા
યા વીણાવરદણ્ડમણ્ડિતકરા
યા શ્વેતપદ્માસના
યા બ્રહ્માચ્યુતશઙ્કરપ્રભૃતિભિર્
દેવૈઃ સદાપૂજિતા
સા માં પાતુ સરસ્વતી ભગવતી
નિશ્શેષજાડ્યાપહા

## મૂલમન્ત્રં

ઓં સં સરસ્વત્યૈ નમઃ (3)

## <u>શ્રીરામધ્યાનં</u>

વૈદેહીમભિવીક્ષ્ય જાતપુળકાં વામાંગમાસેવિનીં
વામેનસ્તનચૂચુકં પુળકિના વામં કરેણામૃશન્
તત્ત્વં દક્ષિણપાણિનાકલિતયા તન્મુદ્રયાદર્શયન્
રામો મારુતિસેવિતો લસતુ મે સામ્રાજ્ય સિંહાસને

## મૂલમન્ત્રં

ઓં રં રામાય નમઃ (3)

ઓં નમોભગવતે રઘુનન્દનાય
રક્ષૌઘવિનાશનાય રિપુચોરવ્યાઘ્ર–
કૃમિકીટપતંગાદિ દુષ્ટસત્વવિનાશનાય
મધુરપ્રસન્નવદનાય અમિતતેજસે
વીરાય રામાય વિષ્ણવે નમઃ

## હનુમદ્ધ્યાનં

યત્રયત્ર રઘુનાથકીર્ત્તનં
તત્રતત્ર કૃતમસ્તકાઞ્જલિં
બાષ્પવારિ પરિપૂર્ણલોચનં
મારુતીં નમત રાક્ષસાન્તકં

મનોજવં મારુતતુલ્યવેગં
જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠં
વાતાત્મજં વાનરયૂથમુખ્યં
શ્રીરામદૂતં શરણં પ્રપદ્યે

ગોષ્પદીકૃતવારાશીં
મશકીકૃતરાક્ષસં
રામાયણમહામાલા–
રત્નં વન્દેઽનિલાત્મજં

## મૂલમન્ત્રં

ઓં હં હનુમન્તાય આઞ્જનેયાય મહાબલાય નમઃ (3)

## મૃત્યુઞ્જયમન્ત્રં (3)

ઓં ત્ર્યંબકં યજામહે
સુગન્ધિં પુષ્ટિવર્દ્ધનં
ઉર્વારુકમિવ બન્ધનાત્
મૃત્યોર્ મુક્ષીય માઽમૃતાત્

## સુદર્શનમન્ત્રં

કલ્પાન્તાર્ક્કપ્રકાશં ત્રિભુવનમખિલં તેજસા
પૂરયન્તં, રકતાક્ષં પિઙ્કકેશં રિપુકુલ ભયદં
ભીમદંષ્ટ્રાટ્ટહાસં! શંખં ચક્રં ગદાબ્જે
પૃથુતર મુસલં ચાપ પાશાઙ્કુશા૰ સ્વૈર્બિભ્રાણં
દોર્ભિરાદ્ધ્યં મનસિમુરરિપું ભાવયે ચક્રસબ્જં

## મૂલમન્ત્રં

ઓં નમો ભગવતે મહાસુદર્શનાય હું ભટ્ટ્ સ્વાહ !! (3)

ઓં કલીં કૃષ્ણાય ગોવિન્દાય ગોપીજન વલ્લભાય
પરાય પરં પુરુષાય પરમાત્મને પરકર્મ્મ મન્ત્ર
યન્ત્રૌષધ અસ્ત્ર શસ્ત્રાણિ સંહરસંહર મૃત્યોર્
મોચય મોચય ઓં નમો ભગવતે મહાસુદર્શનાય
દીપ્તે જ્વાલા પરીતાય સર્વ્વિદ્ક્ષોભણકરાય બ્રહ્મણે
પરંજ્યોતિષે હૂં ભટ્ સ્વાહા !!